# Shri Shuddhadvaitabrahmavidyadhigamaprakaramimamsa

# શ્રીશુદ્ધાદ્વૈતબ્રહ્મવિદ્યાધિગમપ્રકારમીમાંસા

## Document Information

Text title : shuddhAdvaitabrahmavidyAdhigamaprakAramImAMsA

File name : shuddhAdvaitabrahmavidyAdhigamaprakAramImAMsA.itx

Category : misc, vedanta, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_z_misc_general

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશુદ્ધાદ્વૈતબ્રહ્મવિદ્યાધિગમપ્રકારમીમાંસા

પરહંસં ચિન્ત્યમાનં કરચરણાદ્યઙ્ગરહિતમપિ રમ્યમ્ ।
સચ્ચિત્સુખસ્વરૂપં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧॥

તત્ર પરહંસો દ્વિવિધઃ, વિદ્વદ્વિવિદિષુભેદાત્ । તલ્લક્ષણં તુ શ્રીમદ્વિદ્યારણ્યવિરચિતજીવન્મુક્તિવિવેકે સ્પષ્ટમુપલભ્યતે । તત્ર વિવિદિષોર્વિદ્યાગ્રહણપ્રકારઃ કથ્યતે । તથા હિ-નિત્યાનિત્યવસ્તુવિવેકાદિસાધનચતુષ્ટયસમ્પન્નઃ બ્રહ્મનિષ્ઠં સદ્ગુરું પ્રપદ્ય પ્રાર્થનાપૂર્વકં શ્રવણં કુર્યાત્ । પ્રાર્થનાપ્રકારસ્તુ શ્રીમચ્છઙ્કરભગવત્પાદાચાર્યકૃતવિવેકચૂડામણાવનુસન્ધેયઃ । તથા ચ શ્રુતિઃ– "પરીક્ષ્ય લોકાન્ કર્મચિતાન્બ્રાહ્મણો નિર્વેદમાયાન્નાસ્ત્યકૃતઃ કૃતેન । તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્સમિત્પાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠમ્" ઇતિ । અત્ર બ્રહ્મનિષ્ઠપદેન સંન્યાસ્યેવ વિવક્ષિતો નેતરઃ, ઇતરેષાં આસુપ્તેરામૃતેઃ કાલં નયેદ્વેદાન્તચિન્તયા ઇત્યુક્તરીત્યા સાર્વદિકવિચારાદિરૂપબ્રહ્મનિષ્ઠાયા અસમ્ભવાત્ । અત એવ શ્રીમચ્છઙ્કરભગવત્પાદૈઃ મુણ્ડકોપનિષદ્વિવરણે, "બ્રહ્મનિષ્ઠં હિત્વા સર્વાણિ કર્માણિ કેવલે અદ્વયે બ્રહ્મણિ નિષ્ઠા યસ્ય સોઽયં બ્રહ્મનિષ્ઠઃ" ઇતિ, "ન હિ કર્મિણો બ્રહ્મનિષ્ઠતા સમ્ભવતિ, કર્માત્મજ્ઞાનયોર્વિરોધાત્" ઇતિ ચાભ્યધાયિ । ન ચ સંન્યાસિનોઽપિ "ન વ્યાખ્યાનપરો ભવેત્" ઇત્યાદ્યધ્યાપનનિષેધશ્રવણાલ્લોકે સદ્ગુરુર્દત્તજલાઞ્જલિઃ સ્યાદિતિ વાચ્યમ્; સત્કારમાનપૂજાભિક્ષાદ્યુદ્દેશ્યકાધ્યાપનપરત્વાત્તાદૃશનિષેધસ્ય ।

અત એવ મનુઃ "નાનુશાસનવાદાભ્યાં ભિક્ષાં લિપ્સેત કર્હિચિત્" ઇતિ ભિક્ષોદ્દેશ્યકાનુશાસનાદીન્યેવ નિષેધતિ । અત એવ,
"તચ્ચિન્તનં તત્કથનમન્યોન્યં તત્પ્રબોધનમ્ ।
એતદેકપરત્વં ચ બ્રહ્માભ્યાસં વિદુર્બુધાઃ ॥"

“મચ્ચિત્તા મદ્ગતપ્રાણા બોધયન્તઃ પરસ્પરમ્ ।
કથયન્તશ્ચ માં નિત્યં તુષ્યન્તિ ચ રમન્તિ ચ ॥”
ઇત્યાદિવાક્યાનામવૈયર્થ્યમ્ ।
અત એવ ચ કલૌ
લુપ્તયતિધર્મરક્ષણબદ્ધકઙ્કણશ્રીમચ્છઙ્કરભગવત્પાદાન્
પ્રતિમોહસન્તમસવાસરનાથાંસ્તત્ર તત્ર વિનિવેશ્ય વિનેયાન્ ।

પાલનાય પરતત્ત્વસરણ્યા મામુપૈષ્યસિ તતઃ કૃતકૃત્યઃ ॥

ઇતિ વિશ્વેશ્વરાજ્ઞાપિ નાનર્થકપદભાગ્ભવતિ ॥

નનુ, સંન્યાસિવિદ્યાગુરોરલાભે કા ગતિરિતિ ચેત્,
સર્વમતસિદ્ધસંન્યાસિગુર્વેકલભ્યત્વકસ્ય મહાવાક્યોપદેશસ્ય
યા ગતિઃ સૈવેત્યવેહિ । યદિ મહાવાક્યોપદેષ્ટાપિ ગૃહસ્થઃ
સ્યાત્તર્હિ તુરીયાશ્રમો વન્ધ્યાસૂનુતાં વિન્દેત્ । ન ચ
યતિધર્મપ્રબોધવાક્યાદ્ગૃહસ્થસ્યાપિ ગુરુત્વં સમ્ભવતીતિ વાચ્યમ્;
પૂર્વોક્તમુણ્ડકોપનિષદ્વિવરણવિરોધાદશ્રદ્ધેયત્વાત્ । યદિ
તચ્છ્રદ્ધેયત્વેઽપ્યાગ્રહસ્તદા–

“વિના વિપ્રેણ કર્તવ્યં શ્રાદ્ધં કુશચટેન વૈ ।
આત્માનં વાપિ ભુઞ્જીત ન વિપ્રં વેદવર્જિતમ્ ॥”
ઇત્યાદિવાક્યસ્ય, યથા શ્રાદ્ધે વેદવિદ્વિપ્રનિમન્ત્રણાવશ્યકત્વ
એવ તાત્પર્યમ્; ન તુ કુશચટેનાત્મના વા કુર્યાદિત્યત્ર; તથા
યતિધર્મપ્રબોધવાક્યસ્યાપિ ગૃહિણો બ્રહ્મવિદ્યાગુરુત્વે ન
તાત્પર્યમ્ । પરં તુ બ્રહ્મવિદ્યાગ્રહણાવશ્યકત્વપ્રદર્શને
તાત્પર્યમિત્યઙ્ગીકૃત્ય તચ્છ્રદ્ધેયત્વમુપપાદનીયમ્ ।
ક્ષત્રિયકર્તૃકબ્રાહ્મણકર્મક- વૈશ્વાનરવિદ્યાધ્યાપનબોધિકાયાઃ
ક્ષત્રિયસ્ય તદ્વિદ્યામાત્રાધ્યાપકત્વપરતયા બ્રહ્મવિદ્યાદૌર્લભ્યપરતયા
યુગાન્તપરતયા વા નેતું શક્યાયાઃ, છાન્દોગ્ય- શ્રુતેર્બલાત્,
વર્ણવિનિમયેનેવ આશ્રમવિનિમયેનાપિ ગુરુત્વસમ્ભાવનાધીના ગૃહિણોઽપિ
બ્રહ્મવિદ્યાગુરુત્વપ્રત્યાશા, મનુષ્યત્વમાત્રસામ્યાદતિદીનસ્ય
મહાસામ્રાજ્યપ્રત્યાશાતુલ્યતાં કથં ન પ્રાપ્નુયાત્ । કિઞ્ચ,
મુણ્ડકોપનિષ- ચ્છિષ્યગુરુલક્ષણપ્રદર્શનપૂર્વકં
શ્રીમચ્છુદ્ધાદ્વૈતત્રહ્મબિદ્યાધિગમપ્રકારપ્રદર્શનાર્થં પ્રવૃત્તા ।

તસ્યામ્ “પરીક્ષ્ય લોકાન્ કર્મચિતાન્ બ્રાહ્મણો નિર્વેદમાયાત્” ઇતિ, “તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્સમિત્પાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠમ્” ઇતિ, “યેનાક્ષરં પુરુષં વેદ સત્યં પ્રોવાચ તાં તત્ત્વતો બ્રહ્મવિદ્યામ્” ઇતિ ચ શ્રૂયમાણત્વાત્ । અતોઽનધિગતાર્થબોધકત્વરૂપપ્રાબલ્યવત્પૂર્વોક્ત-શ્રુત્યનુસારણૈબ કેવલવિદ્યાબોધકચ્છાન્દોગ્યાદિશ્રુતયો નેયાઃ । ઇત્થં ચ ગૌતમસ્મૃતિસૂતસંહિતાદિવચનાનાં પૂર્વોક્તશ્રુત્યનુસારેણ નેયત્વં કૈમુતિકન્યાયસિદ્ધમ્ ॥

યત્તુ, હીનવર્ણસ્યાપિ બ્રહ્મવિદ્યાગુરુત્વપ્રત્યાયનેચ્છયા શુકોપાખ્યાનોદાહરણમ્, તદુપહાસાસ્પદમેવ । તત્ર પિતૃસકાશાચ્છ્રુતોપનિષત્કસ્યૈવ શુકસ્ય પિત્રનુજ્ઞાતસ્ય સંવાદાર્થં જનકસમીપગમનસ્ય પ્રતિપાદિતત્વાત્ । ન ચ પ્રાચીનશાલસત્યયજ્ઞાદીનાં વિદ્યાપ્રદઃ કેકયરાજઃ સંન્યાસ્યેવેતિ વાચ્યમ્ ।

“મુખજાનામયં ધર્મો વૈષ્ણવં લિઙ્ગધારણમ્ ।
બાહુજાતોરુજાતાનાં નૈવ ધર્મો હિ વિદ્યતે ॥”

ઇતિ ક્ષત્રિયસ્ય સંન્યાસનિષેધાત્ । યદિ ચ ક્ષત્રિયસ્યાપિ સંન્યાસિત્વબોધિકા કાચિચ્છ્રુતિઃ સ્મૃતિર્વોપલભ્યેત, તદા સિદ્ધં નઃ સમીહિતમ્ । યતો ન વયં ક્ષત્રિયત્વાદિકમુદ્દેશ્યતાવચ્છેદકીકૃત્ય બ્રહ્મવિદ્યાગુરુત્વાભાવં સાધયામઃ, કિં તુ સંન્યાસિત્વાપરનામબ્રહ્મનિષ્ઠત્વાભાવમુદ્દેશ્યતાવચ્છેદકીકૃત્ય । યદિ કેકયરાજઃ સંન્યાસી સ્યાત્તદા કિં નશ્છિન્નમ્ । વર્ણવિનિમયસ્તુ નાસ્માકમેવ દોષઃ ॥ કિઞ્ચ, સૂતસંહિતાયાં હીનવર્ણસ્ય ઉત્તમવર્ણગુરુત્વકથનપ્રકરણે “ગુરુત્વં કેચિદિચ્છન્તિ સ્વોત્તમં પ્રતિ કેશવ” ઇત્યત્ર શ્રૂયમાણં કેચિત્પદં દીનવર્ણસ્ય ઉત્તમવર્ણગુરુત્વવિષયે સૂતસંહિતાયા ન મુખ્યં તાત્પર્યમિતિ દ્યોતયતિ ॥

યદિ કશ્ચિદ્બ્રૂયાત્– હીનવર્ણસ્ય ઉત્તમવર્ણગુરુત્વાભાવેઽપિ હીનાશ્રમિણોઽપિ વિદ્યોત્કર્ષબલેન ઉત્તમાશ્રમિગુરુત્વપ્રતિપાદકસૂતસહિતાવચનબલાત્ , હીનાશ્રમિણઃ ઉત્તમાશ્રમિગુરુત્વં નિષ્પ્રત્યૂહમેવેતિ; સ ચેત્થં પ્રષ્ટવ્યઃ- કિં ત્વદભિમતઃ હીનાશ્રમિણઃ ઉત્તમાશ્રમિગુરુત્વપ્રયોજકીભૂતવિદ્યોત્કર્ષઃ, મુણ્ડકોપનિષદ્વિવરણે શ્રીમદ્ભગવત્પાદવ્યાખ્યાતબ્રહ્મનિષ્ઠત્વાપરનામા,

આહોસ્વિદ્વાગ્વૈખર્યાદિરૂપઃ? હીનાશ્રમિણઃ પૂર્વોક્તાદ્યવિદ્યોત્કર્ષાઙ્ગીકારે હીનાશ્રમિણો હીનાશ્રમિત્વમેવ ગગનકુસુમાયિતં ભવેત્ । દ્વિતીયસ્ય તૂત્કર્ષસ્ય વ્રહ્મવિદ્યાગુરુત્વાપ્રયોજકત્વમ્ -

વાગ્વૈખરી શબ્દસરી શાસ્ત્રવ્યાખ્યાનકૌશલમ્ ।
વૈદુષ્યં વિદુષાં તદ્વદ્ભુક્તયે ન તુ મુક્તયે ॥

અતઃ પ્રયત્નાજ્જ્ઞાતવ્યં તત્ત્વજ્ઞાત્તત્ત્વમાત્મનઃ ॥

ઇત્યાદિ વદદ્ભિઃ શ્રીમદ્ભગવત્પાદૈરેવ પ્રકટીકૃતમિતિ હીનાશ્રમિણઃ ઉત્તમાશ્રમિગુરુત્વસિદ્ધૌ, વત્સ તવ કા વા પ્રત્યાશેતિ ॥

ઇદં ત્વવધેયમ્– ઇતરાશ્રમિણાં મોચકબ્રહ્મવિદ્યાયામધિકાર એવ નાસ્તિ ।
“ત્રયઃ પુણ્યા લોકભાજઃ, એકોઽમૃતત્વભાક્,
બ્રહ્મસંસ્થોઽમૃતત્વમેતિ” ઇતિ શ્રુતેઃ ।
“ત્યક્તાશેષક્રિયસ્યૈવ સંસારં પ્રજિહાસતઃ ।
જિજ્ઞાસોરેવ ચૈકાત્મ્યં ત્રય્યન્તેષ્વધિકારિતા ॥”
ઇતિ વાર્તિકાચ્ચ । પરં તુ, સ્વસ્વકર્માવિરોધેન કૃતઃ કેવલબ્રહ્મવિદ્યાભ્યાસસ્તેષાં પાપક્ષયાય ભવતીતિ । “સ્વયં તરિતુમક્ષમઃ કિમપરાનસૌ તારયેત્” ઇતિ ન્યાયેન ઇતરાશ્રમિણાં બ્રહ્મવિદ્યાગુરુત્વં શશવિષાણતુલ્યમ્ । એતદ્વિસ્તરસ્તુ શ્રીમદ્ભગવત્પાદવિરચિતૈતરેયોપનિષદ્વિવરણાદિભાગે વિદ્વદ્ભિરનુસન્ધેયઃ; તસ્માદ્બ્રહ્મનિષ્ઠસ્યૈવ બ્રહ્મવિદ્યાગુરુત્વમિતિ સિદ્ધમ્ । એવં ચ સતિ કેષાઞ્ચિત્ ગૃહિણોઽપિ બ્રહ્મવિદ્યાગુરુત્વસ્ય શાસ્ત્રીયાત્મભ્રમમૂલકો વૈશ્વાનરવિદ્યાદૃષ્ટવિનિમયસામ્યમાત્રેણ સંન્યાસિનિરૂપિતગુરુત્વભ્રમઃ, તદધીનો યો ગ્રહિકર્મકસંન્યાસિકર્તૃકવન્દનસ્ય શાસ્ત્રીયત્વાદિવિચારઃ, સ કથં જન્મવન્ધ્યાયાઃ પ્રપૌત્રપોષણવિચારસદૃશતાં ન વ્રજતીતિ સુધિયો વિદાઙ્કુર્વન્ત્વિત્યલમપ્રસ્તુતચિન્તયા । અતો વિવિદિષુઃ પરમહંસો મૈત્ર્યાદિ- ગુણગણમણ્ડિતં બ્રહ્મનિષ્ઠં ગુરુમાસાદ્ય તન્નિકટે કૃતશ્રવણમનનઃ પશ્ચાત્તદ્દત્તયુક્ત્યા ચિરકૃતનિદિધ્યાસનઃ તતઃ સઞ્જાતબ્રહ્મસાક્ષાત્કારઃ સુખં વિહરેદિતિ સર્વમવદાતમ્ ॥

મન્માનસગતિચતુરઃ ચિદચિત્ક્ષીરામ્બુભેદકૃતિદક્ષઃ ।
નરસિંહનામલસિતઃ કૃત્યા પ્રીતિં પ્રયાતુ પરહંસઃ ॥ ૨॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ
ભારતીસ્વામિભિઃ વિરચિતા શ્રીશુદ્ધાદ્વૈતબ્રહ્મવિદ્યાધિગમપ્રકારમીમાંસા
સમ્પૂર્ણા ।

Proofread by PSA Easwaran

---

*Shri Shuddhadvaitabrahmavidyadhigamaprakaramimamsa*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*